श्री वराह स्तुतिः (वराहपुराणे)

श्री वराह स्तुतिः (वराहपुराणे)

ब्रह्मादय ऊचुः |
जय देव महापोत्रिन् जय भूमिधराच्युत |
हिरण्याक्षमहारक्षोविदारणविचक्षण || 1 ||

त्वमनादिरनंतश्च त्वत्तः परतरो न हि |
त्वमेव सृष्टिकालेऽपि विधिर्भूत्वा चतुर्मुखः || 2 ||

सृजस्येतज्जगत्सर्वं पासि विष्णुः समंततः | [विश्वं]
कालाग्निरुद्ररूपी च कल्पांते सर्वजंतुषु || 3 ||

अंतर्यामी भवान् देव सर्वकर्ता त्वमेव हि |
निष्कृष्टं ब्रह्मणो रूपं न जानंति सुरास्तव || 4 ||

प्रसीद भगवन् विष्णो भूमिं स्थापय पूर्ववत् |
सर्वप्राणिनिवासार्थमस्तुवन् विबुधव्रजाः || 5 ||

इति श्रीवरहपुराणे वेंकटाचलमाहात्म्ये देवकृत श्री वराह स्तुतिः |